# शास्त्री-प्रथमवर्ष

# पञ्चमपत्रम् व्याकरणम्

## पाठ्यक्रमनिष्पत्तय:

(वैयाकरणसिद्धान्तकौमुदी)

शास्त्रिप्रथमवर्षे पञ्चमपत्ररूपेण वैयाकरणसिद्धान्तकौमुदीग्रन्थः निर्धारितः वर्तते। तत्र प्रथमसत्रार्द्धे अस्य ग्रन्थस्य स्त्रीप्रत्ययकारकप्रकरणे पाठ्यक्रमत्वेन निर्धारिते स्तः। स्त्रीप्रत्ययप्रकरणे स्त्रीप्रत्ययान्तशब्दानां ज्ञानं कृत्वा संस्कृतभाषायां तेषां प्रयोगः कर्तुं शक्यते। एवञ्च कर्त्रादिषण्णां कारकाणां प्रथमादिसप्तानाविभक्तीनां च ज्ञानं कृत्वा तेषां प्रयोगः अपि कर्तुं शक्यते। तथा च द्वितीयसत्रार्द्धे अपि अयमेव ग्रन्थः पञ्चमपत्ररूपेण पाठ्यक्रमे निर्धारितः अस्ति। तत्र द्वितीयसत्रार्द्धे अस्य वैयाकरणसिद्धान्तकौमुदीग्रन्थस्य द्वन्द्वसमासप्रकरणात् अपत्याधिकारान्तं यावत् यानि प्रकरणानि सन्ति तेषां ज्ञानं कर्तुं शक्यते |अस्य ग्रन्थस्य अध्ययनेन निम्नलिखितानि प्रयोजनानि सिध्यन्ति।

- टाबादिस्त्रीप्रत्ययान् विज्ञाय तेषां प्रयोगश्च।
- कर्त्रादिषण्णां कारकाणां प्रथमादिसप्तानां विभक्तीनां ज्ञानं प्रयोगश्च।
- द्वन्द्वसमासं विज्ञाय तस्य प्रयोगश्च।
- समासान्तसमासाश्रयप्रत्ययान् विज्ञाय तेषां संस्कृतभाषायां प्रयोगः।
- अपत्यार्थकप्रत्ययान् विज्ञाय तेषां संस्कृतभाषायां प्रयोगश्च।
- छात्राः पत्रममूमधीत्य शास्त्रान्तरम्, दर्शनान्तरम् वेदं च अध्येतुं समर्थाः भवितुमर्हन्ति।